# Madhvamunipratapa Ashtakam

# મધ્વમુનિપ્રતાપાષ્ટકમ્

## Document Information

Text title : Madhvamunipratapa Ashtakam

File name : madhvamunipratApAShTakam.itx

Category : deities_misc, gurudev, vAdirAja, aShTaka

Location : doc_deities_misc

Author : vAdirAjayati

Proofread by : Meenakshi Premanand, Revathy R.

Latest update : May 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 26, 2024

*sanskritdocuments.org*

# મધ્વમુનિપ્રતાપાષ્ટકમ્

ક્વચિત્સુરાન્શાસ્તિ સુરાઙ્ગનાઃ ક્વચિત્
ક્વચિચ્ચ ગન્ધર્વપતીનૃષીન્ ક્વચિત્ ।
ક્વચિત્પિતૄન્ ક્વાપિ નૃપાન્નરાન્ક્વચિ-
ચ્છુભાનયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૧॥

ક્વચિત્પ્રભું સ્તૌતિ સમીક્ષતે ક્વચિત્
ક્વચિત્સ્મરન્નૃત્યતિ ગાયતિ ક્વચિત્ ।
ક્વચિત્તમારાધયતીશ્વરં ક્વચિ-
ન્નમત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૨॥

ક્વચિદ્ધરેર્જીવજડાતિભિન્નતાં
ક્વચિત્પ્રભોઃ સર્વગુણૈશ્ચ પૂર્ણતામ્ ।
ક્વચિચ્ચ તસ્યાખિલદોષશૂન્યતાં
વદત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૩॥

ક્વચિચ્ચ વિષ્ણોરુરુચિત્રરૂપતાં
ક્વચિચ્ચ મુક્તાખિલજીવયન્તૃતામ્ ।
ક્વચિચ્ચ તસ્યાવ્યયચિન્મયાકૃતિં
વ્યનક્ત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૪॥

ક્વચિત્સ્મૃતીઃ ક્વાપિ પુરાણસંહિતાઃ
પ્રવક્તિ સૂત્રં ક્વચિદાગમોક્તિભિઃ ।
ક્વચિચ્ચ ધર્મં ચરતિ ક્વચિચ્ચ તં
બ્રવીત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૫॥

ક્વચિચ્ચ ચાર્વાકકણાદગૌતમ-
પ્રભાકરાદ્વૈતિતથાગતાદિકૈઃ ।
કૃતં મતં યુક્તિશતૈર્વિખણ્ડયન્
વિભાત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૬॥

પરાન્પરાભાવયતિ ક્વચિત્ક્વચિ-
ન્નિજાન્કથાયાં કુશલીકરોત્યયમ્ ।
ક્વચિદ્બુધાન્વૈષ્ણવમાર્ગમાગતાન્
પુનાત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૭॥

ક્વચિત્સમસ્તાગમનિર્ણયોદિતાઃ
કૃતીઃ કૃતા વ્યાકુરુતે સભાન્તરે ।
પ્રહૃષ્ટરોમા નૃહરૌ ક્વચિન્મનો
યુનક્ત્યયં મધ્વમુનિઃ પ્રતાપવાન્ ॥ ૮॥

ઇદં પ્રતાપાષ્ટકમચ્યુતપ્રિય-
શ્રુતિપ્રતીતામલમધ્વયોગિનઃ ।
યતિસ્તદીયોઽકૃત વાદિરાજ
ઉદારધીસ્તસ્ય કૃપાફલાપ્તયે ॥ ૯॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
મધ્વમુનિપ્રતાપાષ્ટકં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Meenakshi Premanand

*Madhvamunipratapa Ashtakam*

pdf was typeset on May 26, 2024

Please send corrections to *sanskrit@cheerful.com*